# Shri Krishnaproktam Purushottamakathavarnanam

# શ્રીકૃષ્ણપ્રોક્તં પુરુષોત્તમકથાવર્ણનમ્

## Document Information

Text title : Shri Krishnaproktam Purushottamakathavarnanam

File name : kRRiShNaproktaMpuruShottamakathAvarNanam.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 1/29-40||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# શ્રીકૃષ્ણપ્રોક્તં પુરુષોત્તમકથાવર્ણનમ્

શ્રીકૃષ્ણ ઉવાચ ।
યશ્ચાઽસ્તિ દિવ્યેઽક્ષરધામ્નિ દિવ્યો હ્યનન્તમુક્તાઽભિસુસેવ્યમાનઃ ।
પરેઽક્ષરાદ્ધામ્નિ વિરાજમાનઃ સોઽયં પૃથિવ્યાં સમવાતતાર ॥ ૨૯॥

શ્રીકૃષ્ણનારાયણનામધેયો હ્યનાદિકૃષ્ણઃ પરમેશ્વરશ્ચ ।
ગોલોકવૈકુણ્ઠનિવાસિભિશ્ચ પ્રગેઽર્ચને વૈ હૃદિ ચિન્ત્યમાનઃ ॥ ૧.૩૦॥

સોઽયં કૃપાભિઃ પૃથિવીતલે કુઙ્કુમાખ્યવાપ્યાં હિ સુરાષ્ટ્રદેશે ।
શ્રીકમ્ભરાલક્ષ્મિસતીગૃહેઽત્ર ગોપાલકૃષ્ણાત્મજતામવાપ ॥ ૩૧॥

યસ્માદહં પૂર્ણતમોઽપિ કૃષ્ણો રાધાપતિશ્ચાપ્યભવં પુરાણઃ ।
લક્ષ્મીપતિશ્ચાપ્યભવદ્યતો વૈ વૈકુણ્ઠધામાધિપતિર્મહાત્મા ॥ ૩૨॥

કૈલાસવાસોઽપિ યતોઽભવચ્ચામૃતાધિવાસોઽપિ યતોઽભવચ્ચ ।
અવ્યાકૃતેશોઽપિ યતોઽભવચ્ચ હિરણ્યગર્ભોઽપિ યતોઽભવચ્ચ ॥ ૩૩॥

શ્રીબદ્રિકેશોઽપિ યતોઽભિજાતઃ ક્ષીરોદવાસી ચ યતોઽસ્તિ જાતઃ ।
શ્વેતાખ્યધામેશ નરાયણોઽપિ યતોઽસ્તિ જાતઃ કમલાપતિર્વૈ ॥ ૩૪॥

અસઙ્ખ્યધામાધિપરેશ્વરાશ્ચ યતો ભવન્ત્યેવ હરેસ્તુ રાધે ।
તસ્યાત્મદેવસ્ય ગુણાનુકીર્તિં વદામિ રાધે પરમેશ્વરસ્ય ॥ ૩૬॥

ત્વયા સ્તુતઃ શ્રીપુરુષોત્તમો યઃ પરાત્પરઃ કારણકારણં ચ ।
સર્વાવતારાધિપતિઃ પુરાણઃ સ્મરામિ તં શ્રીપુરુષોત્તમેશમ્ ॥ ૩૬॥

દ્વિષટ્કયુક્તં કથિતં ચ યત્ શતં ત્વયા પરેશસ્ય તુ મુખ્યયોષિતામ્ ।
દિવ્યાઙ્ગનાનાં ચરણાન્યહં સદા નમામિ તાસાં પતયે નમો નમઃ ॥ ૩૭॥

અહં પુરોદ્ભાવ્ય વિલોકિતસ્ત્વયા સાકં પરેશેન નિવાસનાય વૈ ।
ગોલોકસંજ્ઞં મમ ધામ ચાર્પિતં રાધે વિહારાર્થમનેન તે નમઃ ॥ ૩૮॥

તતઃ પરં યેન નરાયણઃ કૃતો લક્ષ્મ્યા સુયુક્તશ્ચ વિલોકિતશ્ચ સઃ ।

વૈકુણ્ઠસંજ્ઞં પ્રદદૌ ચ ધામ યત્તસ્મૈ પ્રદાત્રે પરમાત્મને નમઃ ॥ ૩૯॥

અથાપિ રૂપં ચ વિધાય શામ્ભવં સત્યા સમં યત્પ્રવિલોકિતં પુનઃ ।
કૈલાસસંજ્ઞં પ્રદદૌ ચ ધામ યત્ નિવાસદાત્રે ગુણધારિણે નમઃ ॥ ૧.૪૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય પ્રથમાધ્યાયાન્તર્ગતં
શ્રીકૃષ્ણપ્રોક્તં પુરુષોત્તમકથાવર્ણનમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧/૨૯-૪૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 1/29-40..

Proofread by PSA Easwaran

*Shri Krishnaproktam Purushottamakathavarnanam*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*